# लघुपाणिनीयवैयाकरणसिद्धान्तकौमुदीग्रन्थद्वयदिशा कृत्तद्धितसमासाश्चेति सूत्रार्थसमीक्षणम्

सुनील उपाध्यायः
अध्यापकः - नव्यव्याकरणम्
श्रीराधादामोदर ज्ञानज्योति संस्कृत माध्यमिक विद्यालयः
चापाकोट ७, स्याङ्जा, नेपालः
sunilupadhayay50@gmail.com

Article History : Received - 21 April. 2026, Reviewed - 12 May 2026, Accepted - 18 June 2026
DOI : https://doi.org/10.3126/ss.v4i05.96266

**लेखसारः**

व्याकृतिः व्याकरणम् अर्थात् व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः विविच्य साधुशब्दाः निष्पाद्यन्ते अनेन इति व्याकरणपदस्य व्युत्पत्तिलभ्य अर्थः । अधुना व्याकरणशास्त्रपरम्परायां पाणिनीयपरम्परा एव प्रचलन्ती अस्ति । प्रक्रियानुसारेण व्याकरणस्य अध्ययनाध्यापनक्रमे तत्र वैयाकरणसिद्धन्तकौमुद्यां पञ्चसन्धिं समाप्य षड्लिङ्गस्य आरम्भे प्रातिपदिक संज्ञाविधायके सूत्रे प्रक्रियाग्रन्थे समन्विते । तत्रस्थं प्रथमं "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" द्वितीयं तु "कृत्तद्धितसमासाश्च" इति । तत्र च - स्मृतस्योपेक्षानर्हत्वात् स्वादिसन्धौ उपयोगिनी या प्रातिपदिकसंज्ञा, तस्याः विषयेऽत्र चर्चा विधीयते । शब्दा अपि अव्युत्पन्नाः व्युत्पन्नाश्च भवन्ति । व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधानार्थमिदं सूत्रं प्रवर्तते । अस्मिन् व्याकरणे प्रसिद्धा प्रातिपदिकसंज्ञा पारिभाषिकी । अतः प्रातिपदिकसंज्ञाविधानाय अस्मिन् पाणिनीये व्याकरणे द्वे सूत्रे स्तः । प्रथमम् अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति, द्वितीयञ्च कृत्तद्धितसमासाश्च इति । किमर्थम् एताभ्यां सूत्राभ्यां प्रातिपदिकमिति महती संज्ञा कृता इति प्रश्ने केचित् विद्वांसः अन्वर्थतायै इति वदन्ति । कृत्तद्धितसमासाश्च इति सूत्रे तद्धितान्तानां प्रातिपदिकसंज्ञाविधानेन अप्रत्ययः तन्त्रेणोच्चारित इति ज्ञाप्यते । तेनास्य सूत्रस्यार्थो धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञा स्यात् इत्युक्तम् । अस्मिन् सूत्रे स्थितानां सम्पूर्णाणां समासयुक्तानां पदानां विच्छेदं कृत्वा सरलया गिरा यथामति अत्रानुन्धानात्मके आलेखे व्याख्या विधीयते । एवं प्रकारेण सिद्धान्तकौमुदीग्रन्थानुसारं तथा च लघुपाणिनीयम् इति ग्रन्थानुसारञ्च अस्य सूत्रस्यार्थसमीक्षणम् एवम् बहूनां विषयाणां निरूपणमपि अत्र वर्तते । भाष्यकारस्य कतिपयानां मतानामपि सामान्यतया निरूपणमत्र विहितमस्ति । अतः अस्य आलेखस्य विषयः 'लघुपाणिनीयवैयाकरणसिद्धान्तकौमुदीग्रन्थद्वयदिशा कृत्तद्धितसमासाश्चेति सूत्रार्थसमीक्षणम्' वर्तते ।

शब्दकुञ्जी - अनुयोगी, प्रत्ययः, प्रातिपिदकम्, स्फोट ।

## विषयप्रवेशः

व्याक्रियन्तेऽनेनेति विग्रहे निष्पन्नस्य करणसाधनस्य व्याकरणशब्दस्योऽर्थो व्याकृतिकरणमेव । असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिरेव व्याकृतिरस्ति । अतः शब्दानुशासनं व्याकरणशब्दस्य अपरपर्यायम् ।

व्याकरणशास्त्रं शब्दनिर्माणविषयकम् वर्तते । महाभाष्यकारेण लक्ष्यलक्षणे व्याकरणम् (त्रिपाठी, वि.सं. १०७७, पृ.१२६) अभिहितम् । विना व्याकरणेन शब्दसाधुत्वं नैव शक्यते कर्तुम् । र घटपटादीनामर्थानामवगमनाय घटपटादीनां शब्दानाम् आवश्यकता बोभोति, परं व्याकरणं विना शब्दानां साधुत्वस्य ज्ञानेन नैव संभूयते । व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद् व्याकरणम्, इति व्युत्पत्तिम् आश्रित्य व्याकरणं नाम शब्दशास्त्रम् । व्याकरणे हि प्रकृतिप्रत्ययादीनां सूक्ष्मातिसूक्ष्मविवेचनं प्रस्तूयते । विवेचनमेव व्याकरणस्य मुख्यार्थः । प्रकृतिप्रत्यययोः, ध्वनिस्फोटयोः, शब्दापशब्दयोः, आकृतिद्रव्ययोः, शब्दनित्यतानित्यतयोः, पदवाक्ययोः, पदपदार्थयोः, वाक्यवाक्यार्थयोः विवेचनं विश्लेषणं च व्याकरणस्य प्रयोजकत्वेनास्थीयते । व्याकरणपरम्परायामनेकानि व्याकरणानि दरीदृश्यन्ते तथापि पाणिनीयं व्याकरणं सर्वोत्कृष्टं गौरवास्पदं स्थानं भजते । पाणिनीयात् प्रागनेकेषां वैयाकरणनां व्याकरणानां च विद्यमानत्वेऽपि लौकिकवैदिकोभयशब्दानामन्वाख्यानम्, प्राचीनवैयाकरणार्चनम्, उत्सर्गापवादभावेन विषयप्रतिपादनञ्चेत्यादिभिः हेतुभिः पाणिनीयव्याकरणमेव साम्प्रतिककाले पठनपाठनादिकार्येषु प्रयुज्यते । व्याकरणशास्त्रेषु पाणिनीयव्याकरणस्य महनीयता स्पष्टतया बोभूयते । उक्तमपि-

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥

पाणिनिना अष्टाध्यायीनामधेयो ग्रन्थो विरचितः । तत्र समेषां शब्दानां साधुत्वसम्पादनाय सूत्राणां सत्त्वेऽपि शब्दसाधुत्वप्रक्रियानुसारं न सन्ति सूत्राणि । अष्टाध्यायीक्रमानुसारेणाध्ययनाय काठिन्यं बोभूयते । तेन प्रक्रियाक्रमं पुरस्कृत्य ग्रन्था रचिताः । प्रथमं यावत् धर्मकीर्तिना रूपावतारो विरचितः । तथैव रामचन्द्रविदुषा प्रक्रियाकौमुदी निर्मिता । परं लौकिकवैदिकोभयशब्दानामन्वाख्यानाभावेन, शब्दज्ञानाय गौरवभूतेन च तान् ग्रन्थानुपेक्ष्य श्रीमद्भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुदी व्यरचि । तस्य मुख्यं प्रयोजनं शब्दसाधुत्वसम्पादनमस्ति ।

वैयाकरणाः शब्दस्य नित्यत्वं स्वीकुर्वन्तीति शब्देन मध्यमाध्वनिव्यङ्ग्यस्य बुद्धिस्थस्य स्फोटात्मकस्य शब्दब्रह्मणोऽङ्गीकारं विदधति । स्फुट्यते = अभिव्यज्यते = प्रकाश्यते वर्णैरिति स्फोटः । अर्थात् अर्थविषयकोपस्थितिजनकतावच्छेदकीभूतशक्तिमत्वम् स्फोटत्वम् । स च स्फोटो वर्णपदवाक्यादिभेदेन अष्टविधः । तेषु स्फोटेषु वाक्यस्फोटस्यैव प्राधान्यं वर्तते । एकतिङ् वाक्यम् । सुप्तिङन्तचयो वाक्यमिति अमरसिंहवचनरीत्या सुबन्ततिङन्तानां समूहभूतं वाक्यम् ।

पुरा तु प्रत्येकं शब्दानां पारायणेन ज्ञानं कर्तव्यमासीत् । बृहस्पतिरपि इन्द्राय प्रतिपदोक्तानां शब्दानां पारायणं विहितवान् परं अन्तं न जगाम । तद्यथा वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम । (त्रिपाठी, वि.सं. २०७७, पृ.६८) परं तेन विधिना साम्प्रतिकेऽल्पसमये शब्दज्ञानं विधातुं नैव शक्यत इति भगवता पाणिनिना शब्दज्ञानाय सरलोपायमाश्रित्य उत्सर्गापवादभावेन विषयनिरूपणं विहितम् । तदुक्तं पतञ्जलिना महाभाष्ये - किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन महतो महतः शब्दौघान् प्रतिपद्येरन् । (त्रिपाठी, वि.सं. २०७७, पृ.७०) पाणिनिना सामान्यविशेषवल्लक्षणमेवाधारीकृत्य अष्टाध्यायी रचिता । यत्र षड्विधानां सूत्राणां निधानं विद्यते । तेषु अन्यतमं संज्ञासूत्रमस्ति । संज्ञासंज्ञिबोधकत्वमेव संज्ञासूत्रत्वम् । यत् सूत्रम् अस्य संज्ञिन इयं संज्ञा एवंरीत्या ज्ञपयति तदेव संज्ञासूत्रम् । यथा वृद्धिरादैच् १।१।१, अदेङ् गुणः १।१।२ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ इत्यादीनि संज्ञासूत्राणि । पदमेव शब्दोऽस्ति । अपदं न प्रयुञ्जीत (त्रिपाठी, वि.सं. १०७३, पृ.२९२) इति कथनमादृत्य अपदानि नैव प्रयुज्यन्ते । अपरिनिष्ठितं न प्रयोक्तव्यमिति हार्दम् । पदन्तु सुबन्तं तिङन्तञ्चेमे वर्तेते । तयोः मध्ये अन्यतमं

सुबन्तं तु सुप्प्रत्ययान्ततदादि वर्तते। नैव सर्वाभ्यः प्रकृतिभ्यः सुप्प्रत्यया आगच्छन्ति। ते सर्वदा प्रातिपदिकेभ्य एव आयान्ति। व्याकरणशास्त्रे प्रातिपदिकं पारिभाषिकमस्ति। प्रातिपदिकसंज्ञां विधातुं व्याकरणशास्त्रे सूत्रद्वयं विद्यते। आदौ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ तदनु कृत्तद्धितसमासाश्च १।२।४६ इती। शक्तिग्राहकत्वं संज्ञासंज्ञिबोधकत्वं वा संज्ञासूत्रत्वम्।

व्याकरणस्य विशेषतः द्विधा परम्परा सुप्रसिद्धा अस्ति। माहेश्वरसम्प्रदायः, ऐन्द्रसम्प्रदायश्च। इदानीन्तनैः अधिकाधिकैः वैयाकरणैः माहेश्वरसम्प्रदाय एव सम्बद्धैः भूयते। अस्मिन् सम्प्रदाये पाणिनि-कात्ययन-पतञ्जलीनां मुनित्रयाणां प्राधान्यमस्ति। किन्तु अस्य सम्प्रदायस्य प्राथमिकाचार्यः पाणिनिरस्ति। अनेनाचार्येण अष्टाध्यायीनामधेयो ग्रन्थो विरचितः। तदनु कात्यायनेन वार्तिकाणां पतञ्जलिना महाभाष्यस्य च रचना विहिता। पश्चादेव अन्ये ये टीकादिकृतः आचार्याः परिलक्षिताः, ते आचार्याः द्विधा व्याकरणस्य व्याख्यानं कृतवन्तः। अष्टाध्यायीसूत्रानुसारिणी प्रथमा व्याख्या। तत्र च वामनजयादित्ययोः काशिकाख्या व्याख्या प्रसिद्धा। काशिकायाश्च पुनः जिनेन्द्रबुद्धिनामधेयेन आचार्येण न्यासाख्या व्याख्या कृता, हरदत्तेन पदमञ्जरीनाम्नी रमणीया व्याख्या समाम्नाता। अपरा च परम्परा प्रक्रियानुसारिण्याः व्याख्यायाः। तत्र प्रक्रियाकौमुद्यादयः ग्रन्थाः प्रसिद्धाः। भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौदीग्रन्थोऽपि एनामेव प्रक्रियां पुरस्कृत्य निर्मितोऽस्ति। तस्यैव वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य प्रसिद्धिरस्मिन् समये अस्ति। प्रक्रियाक्रमे रामचन्द्राचार्यस्य प्रक्रियाकौमुदी, भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी इत्यादीनि प्रक्रियाक्रममनुसृत्य लिखितानि सन्ति। तेषु प्रकियाभागमनुसृत्य लघुपाणिनीयम् एकं प्राचीनं व्याकरणग्रन्थस्य मार्गरूपं रचनाविशेषो वर्तते। लघुपाणिनीयम् व्याकरणपरम्परायाः संक्षिप्तकलावलीकृतममूल्यं ग्रन्थरत्नमस्ति। लघुपाणिनीयं व्याकरणपरम्परायाः संक्षिप्तसाररूपं वर्तते। आर्यपाण्डित्यपरम्परया आर्. राजराजवर्मणा १९११ तमे रचिते प्रथमसंपादने लघुपाण्डित्यपृष्ठभूमौ सूत्राणि संकलितानि। अयं ग्रन्थः पाणिनीयाया अष्टाध्याय्याः प्रकरणानुक्रमेण सङ्कलितानां मुख्यसूत्राणां संक्षेपसाररूपेण प्रस्तुतिः दृश्यते। "लघुसिद्धान्तकौमुदी" इव व्यवहृतेऽस्मिन् ग्रन्थे चतुष्कण्डविभाजनं कृत्वा प्रत्येकं काण्डे विशेषो लक्ष्यीकृतो दृश्यते। प्रथमे शिक्षाकाण्डे पाठकं ध्वनिनियमप्रकरणेण परिचययति, यत्र "उत्-तद् इति प्रत्ययानां स्वरविकारे नियमाः" इत्यादीनि सूत्राणि संक्षेपेण प्रकाश्यन्ते। द्वितीये परिनिष्ठाकाण्डे समासविधानविशेषाः व्याख्याताः, तत्रैव च "कृदन्तप्रकरणे कृदन्तैः सम्प्रयोगविधयः" इत्यादि सूत्राणां सान्दर्भिकटीकाभिः गहनतया विवेचनं सम्पादितम्। तृतीये निरुक्तकाण्डे शब्दवृत्तिनिर्णयार्थं "प्रातिपदिकप्रत्ययविच्छेदः" इति मौलिकसूत्रेभ्यः आरभ्य विभक्तिप्रत्ययानां मूलतत्त्वविश्लेषणं सम्यक् प्रदत्तम्। चतुर्थे आकाङ्क्षाकाण्डे पाठकस्य सिद्धिप्रयत्नं प्रोत्साहयन् "साधकसामर्थ्यनिर्धारकप्रक्रियाः" इति सूत्ररूपेण निर्दिष्टाः, यत्र प्रत्यक्-काण्डस्य साधनानि, अभ्यासविधयः च संक्षेपेण संयोजिताः। एवम् एते चत्वारः काण्डाः परस्परपूरकाः। युक्त्या सङ्क्षिप्तया सरलया सरसया च शैल्या पाणिनीयसूत्रार्थानां दीर्घं विस्तारणं च एकस्मिन् सूत्रसारग्रन्थे निस्सन्देहं साधयन्ति आचार्याः। अनेन पाठकः पतञ्जलेः महाभाष्येऽभ्युदितानां वृत्तिपद्धतीनां विस्तृतसूत्रार्थव्याख्यानस्य ज्ञानञ्च सरलया रीत्या प्राप्तुं समर्थः। लघुपाणिनीयस्य सूत्रपठने संक्षिप्तता मुख्यं लक्ष्यं वर्तते। सुबोधशैलीसत्त्वेऽपि पाण्डित्यवीक्षणमत्र लभ्यते, यत्र एकं सूत्रं बहुविधानर्थान् सूचयति। लघुपाणिनीयस्य आदौ नामरूपावलिपर्यन्तभागे लघुना शब्देनैव विभक्तिकार्यार्थनिर्णयं परिलक्ष्य ज्ञायते यत् - अनेन ग्रन्थेन व्याकरणस्य शीघ्रग्रहणं साध्यते। आधुनिकशिक्षासन्दर्भे च लघुपाणिनीयं लोकप्रियम् अस्ति, यतः तस्य संक्षेपशैली व्याकरणारम्भिणां पठने दृढीकरोति। अत्रत्यानि सूत्राणि पाण्डित्ययुक्तशब्दचित्रेण संक्षेपेणैव तत्त्वसारं उद्घोषयन्ति। तेषां

सूत्राणां संक्षिप्त-सारपूर्ण-पाण्डित्ययुक्तस्वरूपेण व्याकरणारम्भिणां त्वरितज्ञानं साध्यते। लघुपाणिनीयग्रन्थेन व्याकरणस्य मूलतत्त्वविवेचनं लघुशैल्या सम्यक् साधितम्।

व्याकरणशास्त्रे पठितासु संज्ञासु मध्ये प्रातिपदिकमिति संज्ञा अन्यतमास्ति । अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च एतत्सूत्रद्वयं प्रातिपदिकसंज्ञाविधायकम्। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण धातुभिन्नानां प्रत्ययभिन्नानां प्रत्ययान्ततदादिभिन्नानां च अर्थवच्छब्दस्वरूपाणां प्रातिपदिकसंज्ञा भवति । कृत्संज्ञकप्रत्ययान्तानां तद्धितान्तानाञ्च शब्दानां प्रत्ययान्ततदादित्वम्। अतः अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञा न प्राप्नोति। किन्तु तेषां पदत्वेन व्यवहृतिः भवति। पदत्वेन व्यवहाराय सुब्विभक्तीनामावश्यकता भवति । सुब्विभक्तेरानयनाय प्रातिपदिकत्वमावश्यकीभूतं भवति । अतः तेषां कृदन्ततदादीनां तद्धितान्ततदादीनां प्रत्ययान्ततदादित्वेन अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञाया अप्राप्तत्वात् प्रातिपदिकसंज्ञाविधानाय सूत्रकारेण कृत्तद्धितसमासाश्च इति सूत्रं निर्मितम्। तद्यथा - पच्धातोः कर्तरि अर्थे ण्वुल्तृचौ ३।१।१३३ इति सूत्रेण ण्वुल्यनुबन्धलोपे युवोरनाकौ ७।१।१ इति सूत्रेण अकादेशे अत उपाधायाः ७।२।११६ इति सूत्रेण उपाधावृद्धौ पाचक इति भवति। अत्र पाचकस्य कृदन्तत्वात् कृत्तद्धितसमासाश्च अनेन सूत्रेण प्रातिपदिकसंज्ञा राध्यति।

अस्मिन् सूत्रे कृत्प्रत्ययेन कृदतिङ् ३।१।९३ इति सूत्राधिकारस्थैः सूत्रैः विहितानां प्रत्ययानां ग्रहणं भवति। तत्र च प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् इति परिभाषया तदादिविधौ येन विधिस्तदन्तस्य इति तदन्तविधिना कृदन्ततदादिरित्यर्थः । कृत्प्रत्ययविधायकानि सूत्राणि धातोः ३।१।९१ इति सूत्राधिकारस्थानि सन्ति । अतः सर्वेऽपि कृत्प्रत्ययाः धात्वतिरिक्तप्रकृतिभ्यो नैवागच्छन्ति । तथैव सूत्रे तद्धितप्रत्ययेन तद्धिताः ४।१।७६ इति सूत्राधिकारस्थैः सूत्रैः विहितानां प्रत्ययानां ग्रहणं भवति । एतत्प्रत्ययविधायकसूत्राणि ङ्याप्प्रातिपदिकात् ४।१।१ इति सूत्राधिकारस्थानि सन्ति। अतः सर्वेऽपि तद्धितप्रत्ययाः प्रातिपदिकेभ्य एव आगच्छन्ति। अत्र समासेन 'प्राक्कडारात् समासः' इति सूत्राधिकारे पठितैः समासविधायकसूत्रैः निर्मितानां समस्तशब्दानां स्वीकरणं भवति । अतः प्रातिपदिकसंज्ञाविधायकस्य अपरस्य कृत्तद्धितसमासाश्च इत्यस्य सूत्रस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेणाप्राप्तस्थले आवश्यकता विद्यत एव । अतः परिच्छेदेऽस्मिन् कृत्तद्धितसमासाश्च इत्यस्य सूत्रस्य विशदा चर्चा क्रियते। अस्मिन् आलेखे लघुपाणिनीयवैयाकरणसिद्धान्तकौमुदीग्रन्थद्वयदिशा कृत्तद्धितसमासाश्चेति सूत्रार्थसमीक्षणम् भवति।

**अध्यननस्य प्रमुखाः समस्याः**

"कृत्तद्धितसमासाश्च" इति संज्ञासूत्रमस्ति। संज्ञासंज्ञिसम्बन्धबोधकत्वं संज्ञासूत्रत्वम्। इदं सूत्रं कृत्तद्धितान्तयोः समासस्य प्रातिपदिकसंज्ञां करोति । व्युत्पन्नानां प्रातिपदिकसंज्ञाविधानार्थं इदम् सूत्रम् । अत्रालेखेऽस्य सूत्रस्य विशदरूपेण व्याख्याविवेचने च कृते स्तः। वैयाकरणसिद्धान्तकौमुदीग्रन्थदिशा तथा च लघुपाणिनीयम् इति ग्रन्थदिशा च अत्र सूत्रस्य वाक्यार्थबोधः कथं भवति ? तत्र स्थितानां सूत्रस्थपदानां केन सहान्वयो भवति ? तत्र च का तुलना ? तत्सर्वं अस्मिन् आलेखे यथामति पूर्णता प्राप्यते। आलेखेऽस्मिन् स्थिताः प्रमुखाः समस्याः अधोलिखिताः सन्ति :

क) सूत्रस्य परिष्कृतः परिमार्जितश्च अर्थः कः ?

ख) कीदृशस्य शब्दस्य प्रातिपदिकसंज्ञा विधीयतेऽनेन सूत्रेण ?

ग) वैयाकरणसिद्धान्तकौमुदी तथा च लघुपाणिनीयम् ग्रन्थानुसारेण "कृत्तद्धितसमासमाश्च" सूत्रस्थं मतं किम् ?

**अध्ययनस्योद्देश्यम्**

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति। समस्याकथनप्रसङ्गे निर्दिष्टानां समस्यानां वैयाकरणसिद्धान्तकौमुदी तथा लघुपाणिनीयम् इति ग्रन्थानुसारं विवेचनं तथा व्याख्यानमेवास्यानुसन्धानस्योद्देश्यं वर्तते। सामान्यतया अनुसन्धानात्मकस्य अस्य लेखस्य उद्देश्यानि यथा :

क) शास्त्रार्थशैल्यां परिमार्जितस्यार्थस्य विवेचनम्।

ख) अनेन सूत्रेण कीदृशस्य शब्दस्य प्रातिपदिकसंज्ञा विधीयत इति विवेचनम्।

ग) वैयाकरणसिद्धान्तकौमुदी तथा च लघुपाणिनीयम् इत्यनयोः आधारेण "कृत्तद्धितसमासमाश्च" सूत्रस्थानां मतानामुपस्थापनम्।

## अध्ययनविधिः

प्रस्तुतस्याध्ययनस्य कृते सामग्रीसङ्कलनार्थं पुस्तकालयस्योपयोगो विहितः । पाणिनीयसूत्रेषु केन्द्रीभूयसिद्धान्तकौमुद्याः, लघुसिद्धान्तकौमुद्याः लघुपाणिनीयञ्च आलम्ब्य मुख्यतया पुस्तकालयीयं विधिमवलम्ब्यैव विहितमिदमध्ययनम् । अत्र व्याकरणसम्बद्धाः सूत्रार्थनिरूपकाः ग्रन्थाः प्रमुखसमाग्रीत्वेन प्रयुक्ताः वर्तन्ते। अन्ये व्याकरणसम्बद्धाः अनूदिताः ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीतास्सन्ति।

**अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च**

अस्मिन् आलेखे ‘‘कृत्तद्धितसमासाश्च’’ इति सूत्रस्य समग्रं परिष्कारपूर्वकः परिचयः प्रस्तूयते । वैयाकरणसिद्धान्तानुसारं तथा च लघुपाणिनीयानुसारं द्वयोः ग्रन्थयोः मते सूत्रस्यास्य व्याख्यानावसारे यन्मतवैविध्यं विद्यते तस्य स्पष्टतया विवेचनम् विश्लेषणमेवास्य अनुसन्धानात्मकलेखस्य मूलं सीमा च वर्त्तेते।

## विषयनिरूपणम्

**सामान्यसूत्रार्थः**

भगवता पाणिनिना स्वकीयेऽष्टाध्यायीग्रन्थे प्रथमाध्यायस्य द्वितीयपादस्य षट्चत्वारिंशत्तमत्वेन कृत्तद्धितसमासाश्च इति सूत्रं पठितम्। सूत्रेऽस्मिन् कृत्तद्धितसमासाः प्रथमायाः बहुवचनान्तम्, च इति अव्ययमिति कृत्वा पदद्वयं विद्यते। कृच्च तद्धितश्च समासश्च इति लौकिविग्रहः, कृत् सु तद्धित सु समास सु इति अलौकिकविग्रहे द्वन्द्वे च १।१।३१ इति सूत्रेण इतरेतरद्वन्द्वसमासं विधाय कृत्तद्धितसमासाः इति रूपं भवति। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रात् सूत्रेऽस्मिन् प्रातिपदिकम् इति अनुवृत्य श्रीमद्भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यामर्थः - कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः इति लिखितः। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ इति सूत्रात् सूत्रेऽस्मिन् अर्थवदित्यस्य शब्दाधिकारो भवति। अत्र अधिकारशब्दः अनुवृत्तिबोधकः अस्ति। सोऽधिकारः शब्दाधिकारार्थाधिकारभेदेन द्विविधो भवति । अर्थविशिष्टस्याधिकारः अर्थाधिकारः । अर्थरहितशब्दमात्रस्याधिकारः शब्दाधिकारः । अस्मिन् सूत्रे वृत्तिमत्वार्थरहितार्थवदिति शब्दस्याधिकारो भवति। अर्थः अस्यास्तीति विग्रहे तदस्यास्त्यस्मिन्निति मतुप् ५।२।९४ इति सूत्रेण षष्ठ्यर्थे प्रशंसार्थे मतुपि सत्यनुबन्धलोपे मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८।२।९ इति सूत्रेण मकारस्य वकारादेशे भवति। अर्थनिष्ठप्राशस्त्यञ्च एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वमेव। अतः येषां शब्दानां विशिष्टार्थोपस्थापकत्वेन

लोके प्रयोगार्हत्वं संभवति तेषामेव शब्दानां सूत्रेणानेन प्रातिपदिकसंज्ञा भवति । तथैव कृत्तद्धितयोः प्रत्ययमात्रबोधकत्वेन तदन्तविधौ सति कृत्तद्धितौ कृदन्ततदितान्तपरौ स्तः । अतः कृदन्तानां तद्धितान्तानां च पूर्वोक्तार्थवत्वविशिष्टानां प्रातिपदिकसंज्ञा सिद्ध्यति । पूर्वसूत्रेण अप्रत्ययान्तशब्दानां प्रातिपदिकसंज्ञायाम् कृतायाम्, प्रत्ययान्तशब्दानाम् प्रातिपदिकसंज्ञाविधानार्थम् इदं सूत्रम् प्रारभ्यते । ये शब्दाः कृत्प्रत्ययान्ताः सन्ति, तद्धितप्रत्ययान्ताः वा सन्ति तेषाम्, तथा च समासेन सिद्धानां शब्दानाम् अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति । अष्टाध्याय्यां तृतीयाध्याये "कृदतिङ्" ३।१।९३ अस्मिन् अधिकारे कृत्प्रत्ययाः पठ्यन्ते । एते प्रत्ययाः धातुभ्यः विधीयन्ते । एतेषाम् प्रयोगेण जायमानस्य कृदन्तस्य प्रकृतसूत्रेण प्रातिपदिकसंज्ञा भवति । यथा, 'रम्' धातोः 'घञ्' प्रत्यये कृते प्राप्तः 'राम' इति कृदन्तशब्दः अनेन सूत्रेण प्रातिपदिकसंज्ञकः भवति । कानिचन अन्यानि कृदन्तप्रातिपदिकानि एतादृशानि - (पाठक = पठ्+ण्वुल्), (कर्तृ = कृ+तृच्) । अष्टाध्याय्यां चतुर्थपञ्चमाध्याययोः तद्धिताः ४।१।७६ अस्मिन् अधिकारे तद्धितप्रत्ययाः पठ्यन्ते । एते प्रत्ययाः प्रातिपदिकेभ्यः विधीयन्ते । एतेषाम् प्रयोगेण जायमानस्य तद्धितान्तस्य प्रकृतसूत्रेण प्रातिपदिकसंज्ञा भवति । यथा, 'कृष्ण' इत्यस्मात् प्रातिपदिकात् 'इञ्' इति तद्धितप्रत्ययं कृत्वा प्राप्तः 'कार्ष्णि' इति तद्धितान्तशब्दः अनेन सूत्रेण प्रातिपदिकसंज्ञकः भवति । कानिचन अन्यानि तद्धितान्तप्रातिपदिकानि एतादृशानि - (गौरव = गुरु + अण्) , (वैनतेय = विनता + ढक्) । अष्टाध्याय्यां द्वितीयाध्यायस्य प्रथमद्वितीयपादयोः "प्राक्कडारात्समासः" २।१।३ अस्मिन् अधिकारे समासविधायकानि सूत्राणि पठितानि सन्ति । एतैः सूत्रैः ये नूतनशब्दाः सिद्ध्यन्ति, तेषाम् प्रकृतसूत्रेण प्रातिपदिकसंज्ञा भवति । यथा, 'सीतायाः पतिः' इत्यत्र "षष्ठी" २.२.८ इत्यनेन तत्पुरुषसमासे कृते प्राप्तः 'सीतापति' शब्दः अनेन सूत्रेण प्रातिपदिकसंज्ञकः भवति । उदाहरणं यथा पीताम्बर (= पीतम् अम्बरम् यस्य सः) । अष्टाध्याय्याम् चतुर्थाध्यायस्य प्रथमपादे अष्टौ स्त्रीप्रत्ययाः पाठिताः सन्ति - टाप्, चाप्, डाप्, ङीष्, ङीप्, ङीन्, ऊङ्, क्तिन् । एते प्रत्ययाः कृत्-प्रत्ययाः अपि न सन्ति, तद्धितप्रत्ययाः अपि न सन्ति । अतः प्रकृतसूत्रेण स्त्रीप्रत्ययान्यशब्दानाम् प्रातिपदिकसंज्ञा न भवति । एवञ्च स्त्रीप्रत्ययान्तशब्दानाम् प्रातिपदिकसंज्ञा एव न भवति, यतः तदर्थम् अष्टाध्याय्यां किमपि सूत्रम् न पठ्यते । परन्तु प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इत्यया परिभाषया - 'यत्र प्रातिपदिकम् अनुसृत्य किञ्चन कार्यम् उक्तम् अस्ति, तत्र तस्मात् प्रातिपदिकात् स्त्रीप्रत्ययं कृत्वा सिद्धे शब्दे अपि प्रातिपदिकत्वमारोप्य तत् कार्यम् भवितुम् अर्हति' इति अर्थः उच्यते, अतः प्रातिपदिकत्वमारोप्य तत्रापि कार्यनिर्वाहः कर्तव्य इति । अपि च, "ङ्याप्प्रातिपदिकात्" ४.१.१ इत्यस्मिन् सूत्रे 'ङी' तथा 'आप्' एतयोः ग्रहणमुपलक्षणमिति अन्यप्रत्ययान्तानामपि भवति प्रातिपदिकत्वम् ।

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति अनया परिभाषया यत्र संज्ञाविधायकसूत्रे प्रत्ययस्य निर्देशः क्रियते तत्र सा संज्ञा प्रत्ययस्यैव भवति, न हि प्रत्ययान्तस्य । प्रकृतसूत्रे अस्याः परिभाषायाः आश्रयणनेन केवलम् कृत्-प्रत्ययानाम् तद्धितप्रत्ययानाम् च प्रत्ययसंज्ञा भवेत्, न हि तदन्तानाम् । परन्तु केवलप्रत्ययानां प्रातिपदिकसंज्ञायाः न किञ्चन प्रयोजनम्, अतोऽत्र 'अन्त'ग्रहणम् कृत्वैव अर्थनिर्णयः क्रियते । तात्पर्यमस्ति - निषेधपरिभाषा नात्र प्रवर्तते । साक्षात्प्रत्ययस्य यत्र संज्ञाविधानं तत्रैव तत्प्रवृत्तेः । प्रकृते च साक्षात् अर्थवतः संज्ञेति भावः ।

वस्तुतः अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५ इत्यनेनैव सूत्रेण सामासिकशब्दानाम् प्रातिपदिकसंज्ञा भवितुम् अर्हति, यतः सामासिकशब्दाः अर्थवन्तः सन्ति, धातुसंज्ञकाः न सन्ति, प्रत्ययान्ताः च न सन्ति । अनेन प्रकारेण पूर्वसूत्रेणैव प्रातिपदिकसंज्ञायां सिद्धायाम् प्रकृतसूत्रे 'समास'ग्रहणम् नियमार्थम् अस्ति । यत्र द्वयोः अधिकानाम् वा

पदानाम् समूहः दृश्यते, तत्र केवलं समासस्यैव प्रातिपदिकसंज्ञा भवति, अन्येषाम् पदसमूहानाम् न इति अत्र नियमः । अनेन नियमेन वाक्यस्य प्रातिपदिकसंज्ञा प्रतिषिध्यते । वाक्यम् अपि समाससदृशः पदसमूहः एव । तत् अपि अर्थवत् अस्ति, धातुसंज्ञकम् प्रत्ययान्तं च नास्ति (यद्यपि वाक्यस्य अन्ते विद्यमानः शब्दः प्रत्ययान्तः एव, तथापि **प्रत्ययग्रहणे यस्मात्स विहितः तदादेः तदन्तस्य च ग्रहणम्** इति परिभाषया इदं प्रत्ययान्तत्वं तस्य शब्दस्य कृते एव स्वीक्रियते, वाक्यस्य कृते न, अतः वाक्यम् तु अप्रत्ययान्तम् एव - इति आशयः ) । अतः **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** १।२।४५ इत्यनेन तस्य प्रातिपदिकसंज्ञायां प्राप्तायाम् प्रकृतसूत्रे समासग्रहणेन सा निषिध्यते ।

**सिद्धान्तकौमुद्यनुसारेण सूत्रविश्लेषणम्**

कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः । पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम् । यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव। तेन वाक्यस्य न । इति सिद्धान्तकौमुद्याः मूलम् । इदं प्रातिपदिकसंज्ञाविधायकं सूत्रमस्ति । कृत्तद्धितसमासाः, च इति पदच्छेदः । कृत् च तद्धितः च समासः च = कृत्तद्धितसमासाः इतरेतरद्वन्द्वसमासः । 'कृत्' 'तद्धित' इति पूर्वाचार्याणां संज्ञे । समसनं = समासः। पूर्वसूत्रात् 'प्रातिपदिकम्' इति पदम् अनुवर्तते। अत्र बहुवचनान्ततया विपरिणम्यते । 'प्रत्ययग्रहणे यस्मात्सविहितस्तदादेस्तन्तस्य ग्रहणम्' इति परिभाषया कृत्तद्धितयोः तदन्तग्रहणं भवति । अतः कृदन्तः, तद्धितान्तः इति लभ्यते । किञ्च कृत्तद्धितान्तयोः अर्थवत्त्वात् धातुप्रत्ययभिन्नत्वाच्च पूर्वसूत्रेणैव प्रातिपदिकसंज्ञायाः सिद्धौ अत्र सूत्रे कृत्तद्धितग्रहणं किमर्थम् ? समाधानन्तु तत्र सूत्रे अप्रत्ययः इत्यस्य प्रत्ययं प्रत्ययान्तं च वर्जयित्वा इत्यर्थस्वीकारात्, कृत्तद्धितान्तयोः प्रत्ययान्तत्वात् पूर्वसूत्रेण 'अर्थवदधातु...' इत्यादिना प्रातिपदिकसंज्ञायाः अप्राप्तौ अस्मिन् सूत्रे कृत्तद्धितग्रहणम् । एवञ्च कृत्प्रत्ययान्ताः, तद्धितप्रत्ययान्ताः समासाः च प्रातिपदिकसंज्ञाः स्युः इति फलितार्थः। कृत्तद्धितसमासाश्च इत्यत्र चकारः अनुक्तसमुच्चयार्थः भवति । अनुक्ताः तु अनर्थकाः निपाताः। तेषाम् अनेन सूत्रेण प्रातिपदिकसंज्ञा सिद्ध्यति । रामशब्दस्य प्रातिपदिकसंज्ञाविषये व्युत्पत्यव्युत्पत्तिपक्षभेदेन द्विविधो विचारः प्रवर्तते । तत्र अव्युत्पत्तिपक्षे रामशब्दस्य अखण्डार्थवाचकत्वात् प्रकृतिप्रत्ययविभागाभावेन "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति पूर्वसूत्रेणैव प्रातिपदिकसंज्ञा सिध्यति । यदा च 'रमन्ते योगिनोऽस्मिन्' इति व्युत्पत्तिपक्षः स्वीक्रियते, तदा रम्‌ धातोः घञ्प्रत्ययान्तत्वाद् अस्य कृदन्तत्वं सुप्रसिद्धम् । अतः कृदन्तत्वाद् 'कृत्तद्धितसमासाश्च' इति उत्तरसूत्रेण अस्य प्रातिपदिकसंज्ञा विधीयते ।

समासग्रहणस्य नियमार्थत्वप्रतिपादनम् - 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति पूर्वसूत्रे अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् इत्युक्तम् । तथा च राजपुरुष इति समासः अर्थवान्, न धातुः, न प्रत्ययः, न वा प्रत्ययान्तः । यद्यपि राजन् ङस् पुरुष सु इति समासे प्रत्ययः अन्ते दृश्यते तथापि सः न प्रत्ययान्तः । प्रत्ययो यस्मात् विहितः तदादि तदन्त एव प्रत्ययान्तशब्देन गृह्यते । पूर्वोक्ते समासे श्रूयमाणः सुप्रत्ययः पुरुषशब्दाद् विहितः इति पुरुष सु इत्येव प्रत्ययान्तः। समुदायात् सः न विहितः इत्यतः समुदायः न प्रत्ययान्तः । अतः समासानां प्रातिपदिकसंज्ञा पूर्वसूत्रेण एव सिद्ध्यति । तस्मात् कृत्तद्धितसूत्रे समासग्रहणं व्यर्थम् इति चेत् न कृत्तद्धितसूत्रे समासग्रहणं व्यर्थं न, परन्तु नियमार्थं भवति । तद्यथा कृत्तद्धितसूत्रे यदि समासग्रहणं न क्रियते तर्हि "रामः पाठं पठति' इति वाक्यस्यापि प्रातिपदिकसंज्ञा स्यात् । 'राजपुरुषः' इतिवत् वाक्यस्यापि अर्थवत्त्वात् । वाक्यस्य तु प्रातिपदिकसंज्ञा न इष्यते । समासग्रहणे कृते तु- 'यत्र पदसंघाते पदसमूहे वा पूर्वो भागः पदम् उत्तरभागः प्रत्ययः न, तस्य भवति चेत् समासस्यैव' इति नियमः भवति। तदा वाक्यस्य अर्थवत्त्वेऽपि नियमशरीरे नान्तर्भवति इति हेतोः वाक्यस्य प्रातिपदिकसंज्ञा न भवति। अतः कृत्तद्धितसूत्रे समासग्रहणं व्यर्थं न, किन्तु

नियमार्थं भवति। एवञ्च वाक्यस्य प्रातिपदिकसंज्ञायाः निवारणमेव समासग्रहणस्य फलम् इति फलितार्थः। यत्र सङ्घाते पूर्वो भागः पदम् उत्तरस्तु प्रत्ययो न, तस्य चेद्भवति तर्हि समासस्यैव इति नियमस्वरूपम्। राजन् ङस् पुरुष सु इति समासे, रामः पाठं पठति इति वाक्ये च पूर्वभागे पदमस्ति। तत्र समासस्यैव प्रातिपदिकसंज्ञा इत्यङ्गीकारात् वाक्यस्य न भवति। नियमशरिरे पूर्वो भागः पदम् इति यदि न उच्यते तर्हि बहुपटवः इत्यत्र दोषः स्यात्। तथाहि - पटु जस् इति दशायां 'विभाषा सुपो बहुच् पुरस्तात्तु' इति सूत्रेण बहुच् प्रत्यये बहुपटु जस् इत्यस्य प्रातिपदिकसंज्ञापेक्षिता। तदभावे 'सुपो धातुप्रातिपदिकयोः" इति सूत्रेण जसः लुक् न स्यात्। पूर्वो भागः पदमित्युक्ते बहुपटुशब्दे पूर्वभागस्य पदत्वाभावात् नियमशरीरे तस्य प्रवेशः न भवतीति कारणेन व्यावृत्तिः न भवति। अतः पूर्वो भागः पदमिति वक्तव्यम्। एवम् उत्तरस्तु प्रत्ययो न इति यदि नोच्यते तर्हि जन्मवान् इत्यत्र दोषः। जन्म अस्य अस्तीत्यर्थे जन्मन्शब्दात् मतुप्प्रत्यये जन्मवान् इति रूपम्। प्रकृते जन्म मतुप् इति संघाते पूर्वभागे पदमस्ति इति कारणेन नियमेन व्यावृत्त्या प्रातिपदिकसंज्ञा न स्यात्। उत्तरस्तु प्रत्ययो न इति कथने तु पूर्वभागस्य पदत्वेऽपि उत्तरस्य प्रत्ययत्वात् नियमशरीरे अस्य प्रवेशाभावेन व्यावृत्तिः न भवति। अतः जन्मवत् इत्यस्य प्रातिपदिकत्वे सुबुत्पत्तिः भवति। उदाहरणानि कृदन्तस्य कर्ता, भर्ता। तद्धितान्तस्य औपगवः, दाशरथिः। समासस्य राजपुरुषः, नीलोत्पलम्।

ननु कृत्तद्धितसमासाश्च इति सूत्रे अङ्गीकृतौ कृत्तद्धितौ प्रत्ययौ स्तः। अतः तयोः प्रत्ययमात्रबोधकत्वेन प्रत्ययमात्रबोधकपदघटिते शास्त्रे विशेष्यत्वेन तदादिरूपतिष्ठते इत्यर्थिकया प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् (मिश्र,सन् २०१९, पृ.९६) इति परिभाषया विशेष्यत्वेन तदादिमुपस्थाप्य तदन्तविधेः प्राप्तिर्भवति। तथापि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति (मिश्र,सन् २०१९, पृ.११५) इति परिभाषया तदन्तविधेर्निषेधो भवति। संज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकप्रत्ययमात्रवृत्तिविषयता- प्रयोजकपदं तदादिविशेष्यकतदन्तविधिप्रयोजकं न भवतीत्यर्थः अस्याः परिभाषायाः। कृत्तद्धितसमासाश्च इति सूत्रं संज्ञासूत्रमस्ति। अत्र प्रातिपदिकं संज्ञा अस्ति। संज्ञासूत्रे संज्ञात्वेन यस्य ग्रहणं भवति तस्यैव विधेयता भवति। तथैव यस्य संज्ञा स संज्ञी भवति। अत्र कृत्तद्धितसमासा इति संज्ञिदलम्। यस्य संज्ञित्वं तस्यैव उद्देश्यता भवति। अतः प्रातिपदिके विधेयता कृत्तद्धितयोः प्रत्यययोः समासे च उद्देश्यता प्रातिपदिकसंज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजक कृत्तद्धितप्रत्ययमात्रवृत्ति- विषयताप्रयोजकपदं कृत्तद्धितौ इति। अतः कृत्तद्धितौ तदादिविशेष्यकतदन्तविधिप्रयोजके न भवतः। अतः कृत्तद्धिताभ्यां नियमतः प्रत्ययार्थबोधकाभ्यामेव भाव्यम् न तु प्रत्ययान्तार्थबोधकाभ्यामित्युच्यते चेत्, न अस्मिन् सूत्रे अर्थवदित्यस्य अनुवृत्तिसामर्थ्यात् भवति तदन्तविधिः। तथा हि अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रात् अर्थवदित्यस्य शब्दाधिकारः। अतः प्रशंसायां मतुपि तस्य अर्थः एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपं भवति। न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः (शर्मा,सन् २०१४, पृ. ५९५) इति सिद्धान्तमादृत्य केवलप्रकृतीनां केवलप्रत्ययानाञ्च लोके प्रयोगो न भवति। अतः केवलप्रत्यये एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपार्थवत्त्वाभावात् अर्थवदित्यनुवृत्तिः व्यर्था भवति। अतः तस्य वैयर्थ्येन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति (मिश्र,सन् २०१९, पृ.११५) इति परिभाषा न प्रवर्तते। तेन कृत्तद्धितौ कृदन्ततद्धितान्तपरौ स्तः।

तथा च प्रातिपदिकसंज्ञानिष्ठविधेयतानिरूपिता साक्षादुद्देश्यता अर्थवति इति न तदन्ततानिषेध इति तत्त्वम्।

कृत्तद्धितसमासाश्च इति सूत्रे समासग्रहणं राजन् ङस् पुरुष सु इत्यादीनां समाससंज्ञकानां प्रातिपदिकसंज्ञाकरणाय विद्यते। किन्तु कृत्तद्धितसमासाश्च इति सूत्रे समासग्रहणाभावेऽपि अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण राजन् ङस् पुरुष सु

इत्यादीनां समाससंज्ञकानां धातुभिन्नत्वेन प्रत्ययभिन्नत्वेन प्रत्ययान्ततदादिभिन्नत्वेन वृत्तिमत्त्ववरूपार्थत्त्वेन च प्रातिपदिकसंज्ञा सिद्ध्यति। अतः तेषां प्रातिपदिकसंज्ञासिद्धत्वात् समासग्रहणं व्यर्थं भवति। समासग्रहणं व्यर्थीभूय नियमयति यत् यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैव (शर्मा,सन् २०१४, पृ. १७७। १७८) इति। एतन्नियमे सति रामः गृहं गच्छति इत्यादीनां वाक्यानां धातुभिन्नत्वेन प्रत्ययभिन्नत्वेन प्रत्ययान्ततदातिभिन्नत्वेन अर्थवत्त्वेन च अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञा न भवति। ननु राजन् ङस् पुरुष सु इति समुदायस्य अन्तिमे सुप्रत्ययोऽस्तीति स समुदायः प्रत्ययान्तः। तेन अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रत्ययान्तत्वनिबन्धनप्रातिपदिकसंज्ञानिषेधो प्राप्नोतीति तेषां समासानां प्रातिपदिकसंज्ञाविधानाय कृत्तद्धितसमासाश्च इति सूत्रे राजन् ङस् पुरुष सु इत्यादीनां समाससंज्ञकानां प्रातिपदिकसंज्ञाविधानाय घटकीकृतस्य समासस्य सार्थक्यात् समासग्रहणं नियमयितुं न शक्नोतीति वाक्यानां प्रातिपदिकसंज्ञावारणाय उपायान्तरमन्वेष्यमिति वाच्यम्, अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रघटकाप्रत्ययाघटकप्रत्ययस्य प्रत्ययमात्रबोधकत्वेन प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् (मिश्र,सन् २०१९, पृ.९६) इति परिभाषया विशेष्यत्वेन तदादिमुपतिष्ठते। ततश्च येन विधिस्तदन्तस्य १।१।७२ इति सूत्रेण तदन्तविधौ प्रत्ययान्ततदादिः आगच्छति। प्रत्ययान्ततदादित्वं नाम प्रत्ययत्वविशिष्टत्वम्। अत्र वैशिष्ट्यञ्च स्वनिष्ठचरमावयवतानिरूपकत्वे सति स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयनिष्ठ-आद्यावयवतानिरूपकत्वम्। यथा राम सु इत्यत्र सुप्रत्ययः विधेयः चरमश्च, रामप्रकृतिः उद्देश्या आद्या च। यद्वैशिष्ट्यं यत्र भासते स एव स्वपदार्थः इति नियममाश्रित्य स्वपदेन प्रत्ययस्य ग्रहणं कर्तव्यम्। प्रत्ययनिष्ठचरमावयवतानिरूपकत्वं राम सु इत्यत्र गच्छति। तथैव प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यता रामनिष्ठा, तदाश्रयः राम, तन्निष्ठ-आद्यावयवतानिरूपकत्वमपि राम सु इति समुदाये गच्छतीति स समुदायः प्रत्ययविशिष्टः। तथैव अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रस्यापि यत्र प्रत्ययान्ततदादित्वं अर्थात् प्रत्ययविशिष्टत्वं तत्रैव प्रत्ययान्तत्वनिबन्धनप्रतिषेधो प्रवर्तते। राजन् ङस् पुरुष सु इत्यस्य प्रत्ययान्तत्वेऽपि न प्रत्ययविशिष्टत्वम्। तद्यथा राजन् ङस् पुरुष सु इति समुदाये सुप्रत्यये एव चरमता तथैव राजन्प्रकृतौ एव आद्यता अस्ति। सुप्रत्ययनिष्ठचरमावयवतानिरूपकत्वस्य समुदाये वर्तमानत्वेऽपि सुप्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यता पुरुषेऽस्ति। तदाश्रयः पुरुष, तत्र आद्यताभावेन पुरुषनिष्ठ-आद्यावयवतानिरूपकत्वं समुदाये न गच्छतीति तस्य समुदासस्य प्रत्ययविशिष्टत्वाभावेन अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेणैव प्रातिपदिकसंज्ञा सिद्ध्यतीति कृत्तद्धितसमासाश्च इति सूत्रे समासग्रहणं व्यर्थं भवति। अतः तद् व्यर्थीभूय यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैव इति नियमयत्येव। ननु 'कृत्तद्धितसमासाश्च' इति सूत्रस्य अपूर्वविधित्वे "विभाषा सुपो बहुच् पुरस्तात् तु" इति सूत्रेण विहितस्य बहुच्प्रत्ययस्-य प्रकृत्याः पुरस्तात् प्रयोगात् 'बहुपटुः' इत्यस्य तद्धितान्तत्वाभावेन अर्थात् प्रत्ययस्य अन्तर्भावाभावात् प्रातिपदिकसंज्ञा न स्यात्। तथा सति प्रातिपदिकत्वाभावात् "चितः" ६।१।१६३ इत्यनेन अन्तोदात्तरूपः चित्स्वरोऽपि न सिध्येत्। सूत्रस्यास्य नियमार्थत्वे तु 'यत्र सङ्घाते पूर्वो भागः पदं तस्य चेत् प्रातिपदिकसंज्ञा भवति तर्हि कृत्तद्धितसमासानामेव' इति नियमशरीरम् अङ्गीक्रियते। 'बहुपटु' इत्यत्र पूर्वभागस्य 'बहुच्' इत्यस्य प्रत्ययत्वेन पदत्वाभावात् उक्तनियमस्य अप्रवृत्तौ 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेनैव सूत्रेण प्रातिपदिकसंज्ञायां सिद्धायां तदाश्रितः चित्स्वरोऽपि निर्बाधं सिध्यति। अतः सूत्रस्यास्य नियमार्थत्वमेव ज्यायः, येन बहुपटुशब्दे चित्स्वरसिद्धिः सुष्ठु सङ्गच्छते।

## लघुपाणिन्यनुसारेण सूत्रविश्लेषणम्

लघुपाणिनीयं नाम व्याकरणशास्त्रस्य संक्षिप्तरूपं यत् पाणिनीयसूत्राणाम् चयनपूर्वकं शिक्षायै सज्जीकृतम् । तत्र प्रातिपदिकसंज्ञायाः विषयं विवृण्वत्सु सूत्रेषु "कृत्तद्धितसमासाश्च" इत्येतत् सूत्रम् तृतीयाध्याये शब्दविभागवर्गे सन्निविष्टम् अस्ति । लघुपाणिनीयानुसारेण अस्यार्थो भवति यथा : कृत्प्रत्ययान्तास्तद्धितप्रत्ययान्ताः समासाश्च प्रातिपदिकसंज्ञाः स्युः । तत्र तृतीयाध्यायगताः धातुप्रकृतयः, कृत्प्रत्ययाः । चतुर्थपञ्चमयोरध्याययोर्विहिताः प्रत्ययाः प्रातिपदिकेभ्यो भवन्ति, तेषु प्रातिपदिकप्रकृतिकेषु प्रत्ययेषु विभक्तिस्त्रीप्रत्ययभिन्नाः तद्धितप्रत्यया इत्युच्यन्ते । अन्योन्यान्वितानां पदानामेकीकरणं समासः । तथा च द्विविधं प्रातिपदिकम् - व्युत्पन्नमव्युत्पन्नम् चेति । कृदन्तस्तद्धितान्तः समासश्चेति व्युत्पन्नं त्रिविधम्। सखण्डं व्युत्पन्नम्, अखण्डमव्युत्पन्नम् । अव्युत्पन्नमपि वाचकम्, द्योतकमिति द्विविधम् । तत्र कस्यचित् सत्त्वस्य साक्षात् बोधकं वाचकम्, कस्यचित् संबन्धस्य प्रतीतिकरं द्योतकम् । द्योतकानां प्रातिपदिकानां 'निपाताः' इति संज्ञा कृता ।

एतत्सूत्रं कथयति यत् - कृदन्ताः, तद्धितान्ताः, समासशब्दाश्च "प्रातिपदिक" इति संज्ञां लभन्ते । कृदन्ताः नाम ते शब्दाः, ये धातुविहिताः भवन्ति । यथा - "गम्" इत्यस्मात् धातोः "क्त" प्रत्ययेन - "गत" इत्यस्य निर्माणं भवति । लकारादिभिन्नाः, अर्थवन्तः प्रत्ययाः - कृत्प्रत्ययाः इत्युच्यन्ते । तद्धितान्ताः नाम ते शब्दाः, ये प्रातिपदिकेभ्यः निष्पन्नाः । चतुर्थपञ्चमाध्याययोः विहिताः तद्धितप्रत्ययाः इत्युच्यन्ते । यथा - "गौः" इत्यस्मात् "औपगव" इति शब्दः । यत्र द्वे वा अधिकानि पदानि एकीकृत्य एकं पदं क्रियते, तत्र "समासः" इत्युच्यते । यथा - "राजा + ऋषिः = राजर्षिः"। प्रातिपदिकस्य भेदाः व्युत्पन्नम्, अव्युत्पन्नञ्च । येषां पदानां व्युत्पत्तिः ज्ञायते, ते व्युत्पन्नपदानि । तानि त्रिधा कृदन्ताः, तद्धितान्ताः, समासाः। सखण्डं व्युत्पन्नम् - स्पष्टविग्रहेण युक्तम् । अखण्डं अव्युत्पन्नम् - यत्र स्पष्टं विग्रहः न दृश्यते । येषां पदानां व्युत्पत्तिः न दृश्यते, ते अव्युत्पन्नपदानि । तानि द्विधा - वाचकम् - वस्तुनः साक्षात् बोधकम् । द्योतकम् - केवलं सम्बन्धमात्रं सूचयति । द्योतकपदानि यथा : - ये शब्दाः सम्बन्धमात्रं बोधयन्ति, ते "निपाताः" इत्याख्यायन्ते । यथा - च, एव, हि, वा इत्यादयः।

"कृत्तद्धितसमासाश्च" (१-२-४६) इत्येतत्सूत्रं महर्षिणा पाणिनिना प्रातिपदिकसंज्ञायाः विस्तारं दातुं प्रदत्तम्। यत्र- कृत्, तद्धित, समास - एते त्रयोऽपि प्रकाराः संज्ञायाः विषयत्वेन प्रातिपदिकत्वं प्राप्नुवन्ति। तेषां निर्माणेभ्यः निष्पन्नं शब्दम् "प्रातिपदिक" इति परिभाषां लभते। एते त्रयः प्रकाराः अष्टाध्याय्यां पृथक्-पृथगध्यायेषु निर्दिष्टाः । कृत्प्रत्ययाः धातुजाः भवन्ति, ये तृतीयाध्याये निर्दिष्टाः। तद्धितप्रत्ययाः प्रातिपदिकेभ्यः भवन्ति, चतुर्थपञ्चमाध्याययोः वर्णिताः। समासाः तु पदयोरैक्येन उत्पद्यन्ते। एते सर्वे 'प्रातिपदिक'संज्ञां लभन्ते, ये तत्पश्चात् विभक्त्यादिप्रत्ययानामाश्रयाः भवन्ति । कृदन्ताः यथा - "गतः", तद्धितान्ताः यथा - "पाराशरिः", समासाः यथा - "राजर्षिः"। प्रातिपदिकं द्विविधम् - व्युत्पन्नम्, अव्युत्पन्नं च। व्युत्पन्नं तु कृदन्ततद्धितसमासरूपं त्रिविधम्। सखण्डं व्युत्पन्नं यत्र स्पष्टः विग्रहः सुलभः। अव्युत्पन्नं यत्र व्युत्पत्तिः न दृश्यते, अपि च वाचकं (गौः) अथवा द्योतकम् (हि, च) इति द्विविधम् । द्योतकशब्दानां निपाताः इति संज्ञा अस्ति। एवमेतत् सूत्रं कृत्तद्धितसमासानां स्वरूपं, प्रयोगं च सूचयति, ये प्रातिपदिकसंज्ञायाः मूलाधाराः भवन्ति ।

### निष्कर्षः

व्युत्पन्नशब्दानुद्दिश्य प्रातिपदिकसंज्ञां विधातुं "कृत्तद्धितसमासाश्च" इति सूत्रं वर्तते । अत्र कृत्-तद्धित-समासाः(प्रथमा बहुवचनम्) च (अव्ययम्) इति उद्देश्यदलम् । प्रातिपदिकम् इति विधेयदलम् । अत्र प्रातिपदिकम् इति

अनुवृत्तिपदम् । सर्वेषां शब्दानां विभागः पाणिनिना द्विधा समकारि । तत्र व्युत्पन्नः अव्युत्पन्नश्च । अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञां विधातुं सूत्रं वर्तते 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' । तथैव कृत्तद्धितप्रत्ययान्तानाम् अप्राप्तां प्रातिपदिकसंज्ञां विधातुं 'कृत्तद्धितसमासाश्च' इति सूत्रं विद्यते । एवमेव समासस्य पूर्वसूत्रेणैव प्रातिपदिकसंज्ञा सिद्ध्यति । तच्च इत्थं राजन् ङस्, पुरुष सु इत्यवस्थायां प्रत्येकं पदं सुबन्तम् अस्ति चेदपि समुदायः न सुबन्तः, अतः प्रत्ययान्ताभावादेव पूर्वसूत्रेण प्रातिपदिकसंज्ञा सिध्यति । पुनः समासग्रहणं नियमार्थम्, नियमस्य शरीरं प्रसिद्धमेव । अतः लघुपाणिनीयकारानुसारेण त्रिविधव्युत्पन्नानां शब्दानां प्रातिपदिकसंज्ञा अनेन सूत्रेण विधीयते ।

**सन्दर्भसामग्रीसूची**

गोविन्दाचार्यः (सन् २०२१), *वैयाकरणसिद्धन्तकौमुदी* "श्रीधरमुखोल्लासिनी हिन्दीव्याख्या समन्विता (आदितः अव्यन्नतः प्रथमो भागः), चौखम्बा सुरभारती प्रकाशनम् ।

पतञ्जलिः, (सन् १९९९), *व्याकरणमहाभाष्यम्* (द्वितीयं संस्करण सम्पाद., भा. पञ्चमो भागः), गुरूप्रसादः शास्त्री (सम्पा.), प्रतिभा प्रकाशनम् ।

मीमांसकः, युधिष्ठिरः (सन् २००२), *अष्टाध्यायी*, चौखम्बासुरभारती प्रकाशनम् ।

मिश्र आचार्य मिश्र (सन् २०१९), *परिभाषेन्दुशेखरः*, चौखम्बासुरभारती प्रकाशनम् ।

शर्मा, गिरिधरः (सन् २०११), *वैयाकरणसिद्धान्तकौमुदी*, प्रथम भागः, मोतिलाल बनारसीदासः ।

वरदाराजाचार्यः (वि.सं. २०७१), *लघुसिद्धान्तकौमुदी,* गीताप्रेसः ।

अ.रा. राजराजवर्मा (सन् १९११), *लघुपाणिनीयम्*, अनन्तशयनस्थ भास्करमुद्रालये ।